संस्कृतवार्ता:

दिनाङ्क :-16.09.2025 प्रात: - 06:55

अथ वार्ताः

प्रधानमन्त्री -बिहार:

सद्यः एव घोषितेषु नेक्स्ट्-जनरेशन् जी. एस्. टी.- परिष्काराणां विषये बिहारे प्रवदन्, प्रधानमन्त्रिणा उक्तं यत्, दीपावली, छठ्- इत्यादयः उत्सवाः आगमिष्यन्ति चेत् अधिकांश दैनिक-उपयोग-वस्तुभ्यः महत्त्वपूर्णरूपेण जी.एस.टी. न्यूनीकरणं भविष्यति। सभायां उपस्थितां महिलां सम्बोधयन् श्रीमोदी अवदत् यत् जी. एस्. टी. इत्यस्य न्यूनीकरणेन पाकशालायाः व्ययः पर्याप्तरूपेण सुलभः भविष्यति। दैनिक-वस्तूनि, विविधाः खाद्य-पदार्थाः च निम्न मूल्येषु प्राप्यन्ते। सः अवदत् यत्, अस्मिन् उत्सवे बालानां कृते नूतनानि वस्त्राणि पादत्राणानि च क्रेतुं सुलभं भविष्यन्ति। प्रधानमन्त्री दृढतया अवोचत् यत् यदा सर्वकारः वस्तुतः निर्धनानां विषये चिन्तां करोति तदा एतादृशं प्रभावपूर्णं उपायं करोति।

प्रधानमन्त्री नरेन्द्रमोदी ह्य: बिहारस्य पूर्णिया-जनपदात् चत्वारिन्शत् सहस्र-कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनं, शिलान्यासं च कृतवान्। जनपदस्य गुलाबबागस्य शीशाबाडी इत्यत्र जनसमूहं सम्बोधयन् प्रधानमन्त्री अवदत् यत् बिहारस्य जनानां जीवनं सुकरं कर्तुं डबलइंजन -सर्वकारः निरन्तरं कार्यं कुर्वन्स्तिती।

इतः पूर्वं ह्य: नवनिर्मितस्य पूर्णिया-विमानस्थानकस्य उद्घाटने श्रीमोदी अवदत् यत्, पूर्णिया इदानीं देशस्य विमानयान-मानचित्रे आगतम् इति। एतेन विमानस्थानकेन, पूर्णिया-नगरात् देशस्य अन्येषु भागेषु अन्ताराज्यीय विमानसेवाः आरभ्यन्ते। प्रधानमन्त्री मोदी बिहारराज्ये राष्ट्रिय-मखाना-बोर्ड् इत्यस्य अपि उद्घाटनम् अकरोत्। परिषद् उत्पादनस्य नूतन-तन्त्रज्ञानस्य च विकासं प्रवर्धयिष्यति, सस्योत्पादनानन्तरं प्रबन्धनं सुदृढं करिष्यति, मूल्यवर्धनं प्रक्रियां च प्रोत्साहयिष्यति, विपणनं, निर्यातं, ब्राण्ड्-विकासं च सुकरं करिष्यति, येन बिहारस्य, सम्पूर्णे देशे च मखाना-कृषकाः लाभान्विताः भविष्यन्ति। विद्युत्क्षेत्रे प्रधानमन्त्रिणा भागलपुरस्य पीरपैंती इत्यत्र चतुर्विंशतिशतं यावत् मेगावाट् तापविद्युत्-परियोजनायाः शिलान्यासः कृतः। सः कोसी-मेची-राज्यान्तर्गतं नदी-सम्पर्क-परियोजनायाः प्रथमस्य चरणस्य शिलान्यासम् अपि कृतवान्। रेल-क्षेत्रे प्रधानमन्त्रिणा अनेकासां परियोजनानाम् उद्घाटनम्, शिलान्यासं, नूतनानां रेल्-यानानां ध्वजप्रदर्शनं च कृतम्।

अमित शाहः

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य नवदिल्ल्यां एंटी नारकोटिक्स टास्क फोर्स बलस्य राज्यप्रमुखानां केन्द्र-शासित-प्रदेशानां च द्वितीय-राष्ट्रिय-सम्मेलनस्य उद्घाटनं करिष्यति। सम्मेलनमिदं प्रधानमन्त्रिणः नरेन्द्र मोदिनः मादकद्रव्यमुक्तभारतस्य प्रतिबद्धतां सुदृढं कर्तुं तथा एतल्लक्ष्यं साधयितुं मार्गचित्रं निर्मातुं च रणनीतिक-मञ्चरूपेण कार्यं करिष्यति।

नेपाल्-सहयोग राशि

नेपाल्-देशस्य युवा-नेतृत्वस्य तीव्रतमस्य विद्रोहस्य अनन्तरं, सर्वकारेण जेन-जी आन्दोलने मृतकानां परिवारेभ्यः सहयोगराशेः घोषणा कृता अस्ति। श्वः आयोजिते मन्त्रीमण्डलस्य सभायां एषः निर्णयः स्वीकृतः, गृह-विधि-मन्त्रिणा ओम्-प्रकाश्-आर्यालेन उक्तं यत् यत् प्रत्येकस्य हुतात्मस्य परिवाराय पञ्चदश-लक्ष-रूप्यकाणि क्षत्यापूर्तिरूपेण प्रदीयन्ते। अस्मिन् दशलक्ष रूप्यकाणि प्रत्यक्ष-वित्तीय-साहाय्यरूपेण, पञ्चलक्ष रूप्यकाणि अन्त्येष्ट्यादि क्रियायै च सन्ति।

एशिया कप क्रिकेट

एशिया-कप-क्रिकेट-क्रिडायां गतरात्रौ श्रीलंका दलेन् दुबई अंताराष्ट्रिय क्रिकेट क्रिडांगणे हांगकांग दलं चतु: स्तोभै: पराजितम्।

।।इति वार्ता:।।